॥ পশুপত্যষ্টকম ॥

.. অথ পশুপত্যষ্টকম্॥

ধ্যানম্ .

ধ্যাযেন্নিত্যং মহেশং রজতগিরিনিভং চারুচন্দ্রাৱতংসং
রত্নাকল্পোজ্জ্বলাঙ্গং পরশুমৃগৱরাভীতিহস্তং প্রসন্নম্ .
পদ্মাসীনং সমন্তাত্স্তুতমমরগণৈরৱযাঘ্রকৃত্তিং ৱসানং
ৱিশ্ৱাদ্যং ৱিশ্ৱবীজং নিখিলভযহরং পঞ্চৱক্ত্রং ত্রিনেত্রম্ ..

স্তোত্রম্ .

পশুপতীন্দুপতিং ধরণীপতিং ভুজগলোকপতিং চ সতী পতিম্॥
গণত ভক্তজনারিত হরং পরং ভজত রে মনুজা গিরিজাপতিম্ ॥ ১॥
ন জনকো জননী ন চ সোদরো ন তনযো ন চ ভূরিবলং কুলম্॥
অৱতি কোপি ন কালৱশং গতং ভজত রে মনুজা গিরিজাপতিম্ ॥ ২॥
মুরজডিণ্ডিৱাদ্যৱিলক্ষণং মধুরপঞ্চমনাদৱিশারদম্॥
প্রথমভূত গণৈরপি সেৱিতং ভজত রে মনুজা গিরিজাপতিম্ ॥ ৩॥
শরণদং সুখদং শরণান্ৱিতং শিৱ শিৱেতি শিৱেতি নতং নৃণাম্॥
অভযদং করুণা ৱরুণালযং ভজত রে মনুজা গিরিজাপতিম্ ॥ ৪॥
নরশিরোরচিতং মণিকুণ্ডলং ভুজগহারমুদং ৱৃষভধৱজম্॥
চিতিরজোধৱলী কৃত ৱিগ্রহং ভজত রে মনুজা গিরিজাপতিম্ ॥ ৫॥
মুখৱিনাশঙকরং শশিশেখরং সততমঘৱরং ভাজি ফলপ্রদম্॥
প্রলযদগ্ধসুরাসুরমানৱং ভজত রে মনুজা গিরিজাপতিম্ ॥ ৬॥
মদম পাস্য চিরং হৃদি সংস্থিতং মরণ জন্ম জরা ভয পীডিতম্॥
জগদুদীক্ষ্য সমীপভযাকুলং ভজত রে মনুজা গিরিজাপতিম্ ॥ ৭॥
হরিৱিরিঞ্চিসুরাধিংপ পূজিতং যমজনেশধনেশনমস্কৃতম্॥
ত্রিনযনং ভুৱন ত্রিতযাধিপং ভজত রে মনুজা গিরিজাপতিম্ ॥ ৮॥
পশুপতেরিদমষ্টকমদ্ভুতং ৱিরিচিত পৃথিৱী পতি সূরিণা॥
পঠতি সংশৃনুতে মনুজঃ সদা শিৱপুরিং ৱসতে লভতে মুদম্ ॥ ৯॥